# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-२ ( Sem_4 )** **प्रश्नपत्र-८** **गुणाः - ७०**

**विषयः ज्योतिषशास्त्रम्** C.E 2.4.8 **समयः - ०३:०० तः ०६:००**

**दिनाङ्कः - २६-०४-२०१६** **सन्दर्भग्रन्थः वृहज्जातकम्**

---

**प्रश्नः -१ अधोलिखितेभ्यः कयोश्चित् द्वयोः सन्दर्भ व्याख्यां कुरुत ।** **०८**

*१ सौम्ये रङ्गचरो बृहस्पतियुते गीतप्रियो नृत्तविद्*
*वाग्मी भूगणपः सितेन मृदुना मायापदुर्लङ्घकः ।*
*सद्विद्यो धनदारावान् बहुगुणः शुक्रेण युक्ते गुरौ*
*ज्ञेयः श्मश्रुकरोऽसितेन घटकृद् दातान्नकारोऽपि वा ॥*

*२ जलचरधनभोक्ता दारवासोनुरक्तः समरुचिरशरीरस्तुङ्गनासो वृहत्कः ।*
*अभिभवति सपत्नांस्त्री जितश्चारुदृष्टि र्द्युतिनिधिधिनभोगी पण्डितश्चान्त्यराशौ ॥*

*३ स्वन्तः प्रत्ययिता नरेन्द्रभवेने सत्पुत्रजायाधनो*
*जीवक्षेत्रगेतऽर्कजे पुरबलग्रामाग्रनेताथवा*
*अन्यस्त्रीधनसम्भृतः पुरबलग्रामाग्रणीर्मन्ददृक्*
*स्वक्षेत्रे मलीनः स्थिरार्थविभवो भोक्ता च जातः पुमान् ॥*

**प्रश्नः -२ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु ।** **०८**

*१ ऋक्षशीलाध्यायः ।* *२ ग्रहराशिशीलाध्यायः ।*

**प्रश्नः -३ अधोलिखितेषु कयोश्चित् द्वयोःटिप्पणी लिखतु ।** **०४**

*१ शुकशनिग्रहयोः योगफलम् ।* *२ पुनर्वसुनक्षत्रजन्मफलम् ।*
*३ मीनकन्याराशिस्थचन्द्रफलम् ।* *४ सिंहकन्याराशिस्थबुधफलम् ।*

**प्रश्नः -४ अधोलिखितेषु केषाञ्चित् पञ्चप्रश्नानाम् अतिलघूत्तरं लिखतु ।** **०५**

*१. युतिशब्दस्य अर्थः कः ?* *२ क्रूरग्रहाः के ?*
*२ भौमचन्द्रयोः योगः भवति चेत् फलं किम् ?* *४ शुक्रशनैश्चरयुक्तेः भवति चेत् फलं किम् ?*
*४ प्रवज्याशब्दस्य अर्थः कः ?* *५ भिक्षुशब्दस्य अर्थः कः ?*
*६ ऋक्षशब्दस्य अर्थः कः ?*

**विभागः-२**

**प्रश्नः -५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सन्दर्भ व्याख्यां कुरुत ।** **०८**

*१ आरक्षको वधरुचिः कुशलो नियुद्धे*
*भूपोऽर्थवान् कलहकृत् क्षितिजांशसंस्थे ।*
*मूर्खान्यदाररतकाव्यविदः सितांशे*
*सत्काव्यकृत् सुखपरोऽन्य कलत्रगश्च॥*

२ न कुम्भलग्नं शुभमाह सत्यो नभागभेदाद् यवना वदन्ति ।
कस्यांशभेदो न तथास्ति राशे रतिप्रसङ्गस्तिवति विष्णुगुप्तः ॥

३ स्वत्रिंशाशे बाहुसुतसुखारोग्यभार्यार्ययुक्तः
शुक्रेतीक्ष्णः सललितनुर्विप्रकोर्णेन्द्रियश्च ।
शूरस्तब्धौ विषमवधकौ सद्गुणाढ्यौ सुखिज्ञौ
चार्वङ्गेष्टौ रविशशियुतेष्वारपूर्वांशकेषु ॥

**प्रश्नः -६ अधोलिखितयोः कस्यचिदेकस्य उपरि सारांशं लिखतु ।** **०८**

१ दृष्टिफलाध्यायः । २ आश्रययोगाध्यायः ।

**प्रश्नः -७ अधोलिखितयोः टिप्पणी द्वयं लिखत ।** **०४**

१ धनुतः मीनराशीपर्यन्तस्थितचन्द्रोपरि बुधादिग्रहणां दृष्टिफलम् ।

२ तृतीय-चतुर्थ-पञ्चम्-षष्ठभावस्यसूर्यफलानि । ३ होरास्थितग्रहाणां फलम् । ४ नवांशस्य फलम् ।

**प्रश्नः -८ अधोलिखितेषु केषाञ्चित् पञ्चाप्रश्नानाम् अतिलघूत्तरं लिखतु ।** **०५**

१ जन्मकाले मेषस्थितचन्द्रं यदि भौमः पश्यति् तदा जातकस्य फलं किम् ?

२ सिंहनवांशे स्थितचन्द्रं सूर्यः पश्यति तदा सः क्रोधी भवति न वा ?

३ मकरकुम्भस्य नवांशंस्थितचन्द्रं सूर्यः पश्यति तदा न्यूनसन्ततिकारकं भवति न वा ?

४ अर्किशब्दस्य कः अर्थः ? ५ मकरराशेः स्वामिग्रहः कः ?

६ जन्मकाले सप्तमस्थाने यदि चन्द्रः स्यात् तदा फलं किम् ?

७ जन्मकाले कुण्डल्यां सप्तग्रहाः स्वगृहे भवन्ति चेत फलं किम् ?

## विभागः -३

**प्रश्नः -९ अधोलिखित द्वयोः सन्दर्भं व्याख्यां लिखत ।** **०८**

१ शुभं वर्गोतमे जन्मे वेसिस्थाने च सद् ग्रेह ।
अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च ॥

२ कन्यैव दुष्टा व्रजतीह दास्यं साध्वी समाया कुचरस्त्रियुक्ता ।
भूम्यात्मजर्क्षे क्रमशोंऽशकेषु भौमार्किजीवेन्दुजभा र्गवाणाम् ॥

३ होरानवांशप्रतिमं विलग्नं लग्नाद रविर्यावति वा दृगोण ।
तस्माद् वदेद् तावतिवा विलग्नं प्रष्टुः प्रसूतावितिशास्त्रमाह ॥

**प्रश्नः १० अधोलिखितयोः कस्यचित् एकस्य उपरि सारांशं लिखतु ।** **०८**

१ अनिष्टाध्यायः २ स्त्रीजातकाध्यायः ।

**प्रश्नः ११ अधोलिखितयोः कस्यचित् एकस्य उपरि टिप्पणीं लिखतु ।** **०२**

१ पूर्वजन्मलोकज्ञानम् । २ अग्रिमजन्मलोकज्ञानम् ।

**प्रश्नः १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखतु ।** **०२**

१कारक इति शब्दस्य अर्थः कः ? २ कलत्रशब्दस्य अर्थः कः?

३ पापद्वयमध्यगते शुक्रस्य फलं किम् ?

४ यदिलग्नादठटमभावे सूर्यस्थितः भवति चेत् अग्निभयं भवति न वा ?